**प्रधानमन्त्री-संगोष्ठी**

प्रधानमन्त्रिणा प्रोक्तं यत् पश्चिम-एशिया-संघर्षस्य मध्ये भारतेन, सम्बन्धनिर्माणस्य, निर्णयस्य, संकटप्रबन्धनस्य च क्षमता प्रदर्शिता अस्ति । ह्यः नवदिल्ल्यां निजीमाध्यमेन आयोजितं शिखरसम्मेलनं सम्बोधयन् श्रीमोदी अवदत् यत् फेब्रुवरी-मासस्य अष्टाविंशतिः-दिनाङ्कात् आरभ्य वैश्विक-अशान्तिः अभवत्, तथापि अस्यां कठोर-प्रतिकूल-परिस्थितौ,भारतं स्वस्य प्रगतेः, विकासस्य प्रति प्रतिबद्धतया विश्वासेन च अग्रे गच्छति । प्रधानमन्त्रिणा रेखांकितम् यत् युद्धसदृशेषु परिस्थितिषु अपि भारतस्य नीतिम्, रणनीतिम्, सामर्थ्यं च दृष्ट्वा सम्पूर्णं विश्वं अश्चर्यचकितम् वर्तते ।

**पीएम-संसत्**

इतः पूर्वम्, प्रधानमन्त्री पश्चिम एशियायाः वर्तमानस्थितिम् उद्दिश्य लोकसभां सम्बोधितवान् । अस्मिन्नवसरे श्रीमोदी, इरान्-देशेन सह प्रचलतः अमेरिका-इजरायल-सङ्घर्षस्य प्रमुखपक्षेषु रूपरेखां दत्त्वा, अस्मिन् विषये भारतस्य स्थितिं च प्रकाशितवान् । सदनं सम्बोधयता प्रधानमन्त्रिणा उक्तं यत्, प्रचलित-संघर्षस्य मध्येऽपि भारते ऊर्जासुरक्षा-संकटं नास्ति । सः अवदत् यत्, पेट्रोल, डीजल, गैस, उर्वरकाणां च सुचारु-आपूर्तिः सर्वकारस्य प्रमुखं लक्ष्यम् अस्ति ।

प्रधानमन्त्रिणा उक्तं यत्, सर्वकारः विभिन्नदेशेभ्यः आपूर्तिकर्तृभिः सह नित्यं सम्पर्कं कुर्वन् तैलस्य, अनिलेन्धनस्य च आपूर्तिम् सुनिश्चेतुं प्रयत्नम् करोति । प्रधानमन्त्रिणा उक्तं यत् अस्यां गभीर-परिस्थितौ देशे विदेशेषु च भारतीयानां सुरक्षा सर्वकारस्य सर्वोच्चप्राथमिकता वर्तते ।

प्रधानमन्त्रिणा उक्तं यत्, देशस्य तटीयसुरक्षा, सीमासुरक्षा, अन्तर्जालीय-सुरक्षा, सामरिकप्रतिष्ठानानि इत्येतान् सर्वान् प्रभागान् उच्चसचेतनायां स्थापितम् वर्तते ।

**विदेशमन्त्री-जयशंकरः**

विदेश-व्यवहारमन्त्री डा एस्. जयशंकरः अमेरिका-राज्य-सचिवेन मार्को रूबियो इत्यनेन सह दूरभाषमाध्यमेन वार्तालापं कृतवान् । सामाजिकमाध्यमे डा. जयशंकरेण प्रोक्तं यत्, पश्चिम-एशिया-संघर्षः अथ तस्मात् वैश्विक-आर्थिकतायाः उपरि दुष्प्रभावः इत्यस्मिन् विषये तयोर्मध्ये चर्चा अभवत् । सः अवदत् यत्, द्वावपि एतौ ऊर्जा-सुरक्षा-संकटविषयेऽपि चर्चां कृतवन्तौ ।

**निर्वाचन-आयोगः**

निर्वाचनाधिकारिभिः प्रोक्तं यत्, निर्वाचनायोगेन पश्चिमबंगराज्ये मातदातृ-सघन-पुनरीक्षणात् परं ह्यः प्रथम-पूरक-मतदातृ-सूचिका प्रकाशिता । मुख्यनिर्वाचनपदाधिकारी मनोजकुमार-अग्रवालः अवदत् यत् अद्यावधि प्रायः ऊनत्रिंशत्-लक्षनामानां न्यायः कृतः अस्ति । पूरकसूचौ तेषां मतदातॄणां नामानि सन्ति, येषां प्रकरणानाम् निर्णयः, न्यायिक-अधिकारिभिः सर्वोच्चन्यायालयस्य निर्देशानां अनुसारं कृतः वर्तते ।

**केरलम् नामांकन**

केरलं राज्ये अद्य विधानसभानिर्वाचनार्थं नामाङ्कनपत्राणां सर्वेक्षणं भविष्यति । ह्यः नामाङ्कन-पूरण-प्रक्रियायाः समाप्तेः अनन्तरं राज्ये निर्वाचनप्रचारः तीव्रः अभवत् । त्रयाणां प्रमुख-राजनैतिक-दलानां नेतारः राज्यस्य विभिन्नेषु भागेषु प्रचारकार्यक्रमं वर्धितवन्तः। आगामिषु दिनेषु, प्रमुखनेतृषु मुख्यमन्त्री पिनारायी विजयनः, विपक्षस्य नेता वी. डी. सतीसन्, भाजपा प्रदेशाध्यक्षः राजीवचन्द्रशेखरः च इत्यादयः नेतारः निर्वाचनकार्यक्रमेषु भागं गृहीष्यन्ति । विभिन्न-राजनैतिकदलानां वरिष्ठ-राष्ट्रीयनेतारः अपि प्रचारार्थं राज्यं आगमिष्यन्ति इति अपेक्षा अस्ति ।

**राष्ट्रीय-इण्डोर-एथलेटिक्स**

एथलेटिक्स-क्रीडायाम्, द्विदिवसीयं राष्ट्रीय-इण्डोर-एथलेटिक्स-चैम्पियनशिप इत्यस्य उद्घाटन-संस्करणं, अद्य ओडिशायाः कलिंग-क्रीडाङ्गणे आरभ्यते, यद्धि, भारतीय-एथलेटिक्स-क्रीडायां नूतन-प्रारम्भस्य सूचकं भविष्यति ।

**॥इति वार्ताः॥**